**एपीजे स्कूल पंचशील पार्क नई दिल्ली - १७**
**वार्षिकपरीक्षा - 2021-22**
**कक्षा – नवमी (संस्कृतम् - कोड 122 )**

**समयः - होराद्वयम्** **सम्पूर्णांकाः – 40**

**सामान्यनिर्देशाः-**

* कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 6 पृष्ठानि मुद्रितानि सन्ति।

* कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे -9 प्रश्नाः सन्ति।

* उत्तरलेखनात् पूर्वं प्रश्नयस्य क्रमांकः अवश्यं लेखनीयः।

**प्रश्नपत्रस्वरूपम्**

**खण्डः ' क' -अपठितावबोधनम् 10 अंकाः**
**खण्डः ' ख' रचनात्मक- कार्यम् 15 अंकाः**
**खण्ड- 'ग' पठित - अवबोधनम् 15 अंकाः**

i) अस्मिन् प्रश्नपत्रे त्रयः भागाः सन्ति।
ii) खण्डः ' क' -अपठितावबोधनम्- 10 अंकाः अस्ति।
iii) खण्डः ' ख' रचनात्मक- कार्यम् -15 अंकाः अस्ति।
iv) खण्ड- "ग" पठित - अवबोधनम् -15 अंकाः अस्ति।
v) प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।
vi) सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।
viii) प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः।

**खण्डः ' क' -अपठितावबोधनम्** **अंकाः –10**

**1. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत।**

नकुलः प्रतिदिनं प्रातः स्यूतकमादाय महाविद्यालयं गच्छति सायंकाले च कदा आगमिष्यति इति तु अनिश्चितः एव। पितरौ एतत्सर्वं दृष्ट्वा आहतौ भवतः। पुत्रं बोधयितुञ्च प्रयत्नम् अकुरुताम् परं नकुलः किमपि न शृणोति। एकदा पुत्रं प्रबोधयन्ती माता रुदन्ती वदन्ति यत् धिक् मम जीवितम् , यस्य सूनुरपि अविश्वसिति, मनोगतं भावमेव न ज्ञापयति। मातुः एतादृशेन व्यावहारेण साश्रुनयनः पुत्रः वदति- मातः! अद्यत्वे मम मित्राणि मां मद्यपानाय प्रेरयन्ति। तैः सह अहमपि सानन्दं मद्यपानं धूम्रपानमपि च करोमि खाद्याखाद्यं च खादामि। बहुधा मित्राणि प्रति 'न' इति वक्तुमिच्छामि परमसमर्थः एवात्मानं पश्यामि मित्रतावशात्। मातः! कर्तव्याकर्तव्यमपि विस्मृतं मया। दर्शय मां सन्मार्गम्। एवंभूतं पुत्रं स्नेहेन लालयन्ती माता तमबोधयत् यत्- ' त्यज दुर्जनसंसर्गम् , समानशीलव्यसनेषु चैव सख्यं करणीयमिति। 'मातुः वात्सल्यमयेन बोधनने नकुलः दुर्जनसंसर्गं त्यक्तुं दृढ़निश्चयं करोति।

**अ) एकपदेन उत्तरत- ( केवलं प्रश्नद्वयम्) 1x2=2**

क) 'धिक् मम जीवनम् ' इति का वदति?

ख) कौ आहतौ भवतः?

ग) माता पुत्रं किं त्यक्तुमं अकथयत्?

घ) नकुलः मित्राणि प्रति किं वक्तुमिच्छति स्म?

**आ) पूर्णवाक्येन उत्तरत- 2x2=4**

क) नकुलः मित्रैः सह किं किं करोति स्म?

ख) स्नेहेन लालयन्ती माता पुत्रं किं बोधयति?

**इ) उपरोक्तगद्यांशस्य उचितं शीर्षकं दीयताम्। 1x1=1**

**ई) यथानिर्देशम् उत्तरत- ( केवलं प्रश्नत्रयम्) 1x3=3**

क) ' अद्यत्वे मम मित्राणि मां मद्यपानाय प्रेरयन्ति ' - अत्र किमव्ययपदम्?

ख) ' साश्रुनयनः पुत्रः वदति' - अत्र किं विशेषणपदम्?

ग) 'अनेकशः' इति पदस्य किं समानार्थपदं गद्यांशे प्रयुक्तम्?

घ) गद्यांशे 'शत्रून् ' इति पदस्य किं विलोमपदं प्रयुक्तम्?

## खण्डः ' ख' रचनात्मक- कार्यम् अंका- 15

**2. भवतः नाम कार्तिकः अस्ति। भवतः विद्यालये संस्कृत- नाटकस्य प्रदर्शनं भविष्यति। एतदर्थं स्वमित्रं सत्यनारायणं प्रति लिखितं निमन्त्रणपत्रं मंजूषात् उचितपदानि चित्वा पत्रं पूरयित्वा पुनः उत्तरपत्रिकायां लिखत- 1/2 x10 = 5**

नूतनविद्यापीठः

1) ................

दिनांक- 27/01/2022

प्रिय मित्र सत्यनारायण!

सप्रेम नमः,

नववर्षस्य 2) ............. अत्र सर्वगतं कुशलम्। भवान् अपि कुशली इति मन्ये। अस्माकं विद्यालयस्य 3) ............. नववर्षस्य शुभावसरे भविष्यति। तत्र अस्माकं 4) .......... " रमणीया हि सृष्टिरेषा " इति 5)........... प्रदर्शनं भविष्यति। अहं तस्मिन् नाटके मयूरस्य अभिनयं 6) ............। भवान् तद्दर्शनाय 7) ............ आगच्छतु। मम अपि 8)........... भविष्यति। सर्वेभ्यः अग्रजेभ्यः मम 9) .......... निवेद्यताम् इति।

भवतः मित्रम्।

10) .............

**मञ्जूषा-** कार्तिकः , शुभकामना , त्रिशुरतः , प्रणामान् , वार्षिकोत्सवः , नाटकस्य , विद्यालये , उत्साहवर्धनम् , करोमि , अवश्यम्

**3.चित्रं दृष्ट्वा मञ्जूषा- सहायतया चित्रस्य वर्णनं पञ्चसंस्कृतवाक्येषु लिखत- 5x1=5**

**मञ्जूषा -**

अध्यापकः , छात्राः , चित्रम् , पाठयति , पठन्ति , शृण्वन्ति , पृच्छन्ति
मानचित्रम् , उत्पीठिका , पुस्तकम् , मार्जनी



**अथवा**

**मञ्जूषायां प्रदत्तशब्दानां सहायतया " मम कक्षा " इति विषयम् अधिकृत्य संस्कृतभाषायां पञ्चवाक्यानि लिखत। 5**

**मञ्जूषा-** मित्राणि , अध्यापकाः , अध्यापिका , मम , प्रियः , श्याम - फलकम् , कक्षा - कार्यम् , स्वच्छम् , प्रतिदिनम् , मित्रस्य , नाम , नवमीकक्षा , आसन्दिकाः , आनन्दप्रदम् , छात्राः।

**4. अधोलिखितेषु पञ्चवाक्यानां संस्कृतेन अनुवादः कार्यः- 5x1=5**

1. शेर गरजे।

2. छात्रों ने पाठ पढ़ा।

3. बालक विद्यालय जाते हैं।

4. लड़का बगीचे में घूम रहा है।

5.हम सभी संस्कृत पढ़ते हैं।

6. वे सब कल गाँव जाएँगे।

7. हम सबने भोजन किया।

## खण्ड- "ग" पठित - अवबोधनम् अंका- 15

**5. अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत। 3**

भ्रान्तः कश्चन बालः पाठशालागमनवेलायां क्रीडितुं निर्जगाम। किन्तु तेन सह केलभिः कालं क्षेप्तुं तदा कोऽपि न वयस्येषु उपलभ्यमान आसीत्। यतस्ते सर्वेऽपि पूर्वदिनपाठान् स्मृत्वा विद्यालयगमनाय त्वरमाणा बभूवुः तन्द्रालुर्बालो लज्जया तेषां दृष्टिपथमपि परिहरन्नेकाकी किमप्युद्यानं प्रविवेश। स चिन्तयामास - विरमन्त्वेते वराकाः पुस्तकदासाः। अहं पुनरात्मानं विनोदयिष्यामि। ननु भूयो द्रक्ष्यामि क्रुद्धस्य उपाध्यायस्य मुखम्।

**अ) एकपदेन उत्तरत-1/2x 1=1**

i) तन्द्रालुः बालः एकाकी कुत्र प्रविवेश?

ii) भ्रान्तः बालः कदा क्रीडितुं निर्जगाम?

**आ) पूर्णवाक्येन उत्तरत- 2x1=2**

i) बालेन सह कालं क्षेप्तुं वयस्येषु कोऽपि कथं न उपलभ्यमान आसीत्।

ii) तन्द्रालुः बालः किं चिन्तयामास?

**6. अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रशनानाम् उत्तराणि लिखत। 3**

**जटायो! पश्य मामार्य ह्रियमाणामनाथवत्।**

**अनेन राक्षसेन्द्रेण करुणं पापकर्मणा।।**

**अ) एकपदेन उत्तरत- 1/2x 1=1**

i) अस्मिन् श्लोके सम्बोधनपदम् किम्?

ii) ' पश्य जटायो ' इति का वदति?

**आ) पूर्णवाक्येन उत्तरत- 2x1=2**

i) जटायुः केन ह्रियमाणां सीतां पश्यतु?

ii) पापकर्मः कः आसीत्?

**7. अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नान् उत्तरत। 3**

**पुरुषः -** भोस्तपस्विन्! कथं मामुपरुणत्सि। प्रयत्नेन किं न सिद्धं भवति? कावश्यकता शिलानाम्? सिकताभिरेव सेतुं करिष्यामि स्वसंकल्पदृढतया।

**तपोदत्तः -** आश्चर्यम्! सिकताभिरेव सेतुं करिष्यसि? सिकता जलप्रवाहे स्थास्यन्ति किम्? भवता चिन्तितं न वा?

**पुरुषः -** ( सोत्प्रासम्) चिन्तितं चिन्तितम्। सम्यक् चिन्तितम्। नाहं सोपानमार्गैरट्टमधिरोढुं विश्वसिमि। समुत्प्लुत्यैव गन्तुं क्षमोऽस्मि।

**तपोदत्तः -** ( सव्यंग्यम्) साधु साधु! आञ्जनेयमप्यतिक्रामसि!

**अ) एकपदेन उत्तरत- 1/2x 1=1**

i) पुरुषः काभिः सेतोः निर्माणं करोति?

ii) केन सर्वसिद्धं भवति?

**आ) पूर्णवाक्येन उत्तरत- 2x1=2**

i) पुरुषः कस्मिन् न विश्वसिति?

ii) तपोदत्तः सव्यंग्यम् किं वदति?

**8- अधोलिखितस्य श्लोकस्य अन्वयं मञ्जूषातः उचितपदानि चित्वा पूरयत। ( 1/2 x4= 2)**

**परिधानैरलंकारैर्भूषितोऽपि , न शोभते।**

**नरो निर्माणिभोगीव सभायां यदि वा गृहे।।**

**अन्वयः -** परिधानैः i) ......... अपि ii) .......... ( विद्याहीनः) नरः iii) .......... सभायाम् वा iv) ......... न शोभते।

**मञ्जूषा -** अलंकारैः , निर्मणिभोगीव , गृहे, भूषितः

**अथवा**

**अधोलिखितस्य श्लोकस्य भावार्थं मञ्जूषायाः पदसहायतया पूरयत। ( 1/2x4 = 2 )**

**रामो बबन्ध यं सेतुं शिलाभिर्मकरालये।**

**विदधद् बालुकाभिस्तं यासि त्वमतिरामताम्।।**

**भावार्थः -** i) ............ श्रीरामः त्रेतायुगे पाषाणशिलाभिः यं ii) ............ रचितवान्। त्वम् अद्य iii) .......... एव तत् कार्यं कृत्वा तस्य प्रयत्नम् iv) ............ करोषि।

**मञ्जूषा-** सेतुं , अतिक्रमणं , भगवान् , बालुकाभिः।

**9. घटनाक्रमानुसारं वाक्यानि पुनः लिखत-** **1/2x8= 4**

1.तस्मै ज्ञानदातुम् इन्द्रः वेशं परिवर्त्य तस्य समीपम् अगच्छत्।

2. इदं श्रुत्वा तपोदत्तः विद्यां प्राप्तुं गुरुकुलम् अगच्छत्।

3. तदा तपोदत्तः इदं दृष्ट्वा तस्य उपहासं करोति।

4. एकः तपोदत्तः तपस्यारतः बालकः आसीत्।

5. सः कथयति- भोः! कथमेतत् व्यर्थमेव सिक्ताभिः सेतुनिर्माणं करोषि।

6. सः पुरुषः गंगायाः सिक्ताभिः सेतुनिर्माणम् आरभत।

7. सः विद्याप्राप्त्यै अध्ययनं न कृत्वा केवलं तपः एवं अकरोत्।

8. इन्द्रः अवदत् यदि तपसा एव त्वं विद्यां प्राप्यसि तर्हि अहमपि सिक्ताभिः सेतुनिर्माणं करिष्यामि।